रर्त्तु नवादिषु यातः,३,५,६,९,१०,११,१२, देवगुरोर्विष-
यर्त्तु नवेशगतो,५,६,९,११, ऽथ सुरारिगुरोः समयाचल-
भास्करयातः, ६,७,१२, तीक्ष्णमरीचिसुतादपि भास्करवत्,
१,२,४,७, ८,९,१०,११, अथ लग्नगृहात्त्रिकृताङ्गदशा-
दिषु यातः, ३,४,६,१०,११,१२ । रविरेखाः ।४८। "चन्द्रः
शुभोऽर्कात्त्रिकालाद्रिदन्तावलाशाशिवस्थः, ३,६,७,८,१०,
११, ततः स्वात्कुरामर्तुगवाशाशिवस्थः, १,३,६,७,१०,११,
क्षमाजाद्‌द्विवह्नीषुषड्गोदिगीशेष्व, २,३,५,६,९,१०,११,
थ ज्ञात् कुरामाब्धिवाणागदन्तावलाशाशिवस्थः, १,३,४,५,
७,८,१०,११, जीवात् कुदृग्वेदशैलेभकाष्ठाशिवस्थो,१,२,४,
७,८,१०,११, ऽथ शुक्रात्त्रिवेदेषुशैलग्रहाशाशिवस्थः,
३,४,५,७,९,१०,११, तीक्ष्णांशुदेहोद्भवाद्रामवाणर्त्तुशम्भु-
स्थित,३,५,६,११, उदयाद्व्यवाहर्त्तुकाष्ठाशिवस्थः',३,६,
१०,११, चन्द्ररेखाः । ४९। 'कुजोऽर्काच्छुभो वह्निवा-
णर्त्तुदिक्‌शम्भुगो,३,५,६,१०,११, ऽथेन्दुतोरामकालेशग,
३,६,११, स्ततः स्वात् कुदृग्वेदसुन्यष्टदिक्‌शम्भुगः,१,२,४,
७,८,१०,११, स्वाद्विशानाथपुत्राद्‌गुणेष्वङ्गरुद्रोपयातः ।
३,५,६,११, ततोजीवतः कालकाष्ठाशिवार्कोपयाती, ६,
१०,११,१२, ऽथ देवारिपूज्यादनेहोगजेशार्कसंस्थः,६,८,
११,१२, ततः सूर्य्यपुत्रात् कुवेदागनागग्रहाशाशिवस्थो,
१,४,७,८,९,१०,११, ऽथ लग्नात् कुरामाङ्गदिक् शम्भु-
यातः । १,३,६,१०,११,कुजरेखाः ३९ । बुधोऽर्कतः
शरर्त्तुगोशिवार्कगो,५,६,९,११,१२, ऽथ चन्द्रतोद्विवे-
दकालनागदिङ्‌महेश्वरोपगः । २,४,६,८,१०, ११, भूमि-
जात्कुदृक्कृतागनागगोदशेशग,१,२,४,७,८,९,१०,११,स्त-
तः स्वतः कुवह्निपञ्चषड्नवादिकेषुगः,१,३,५,६,९,१०,
११,१२, वाक्पतेरसाष्ठशम्भुसूर्य्यगो, ६,८,११,१२, ऽथ
शुक्रतः कुवाक्ववह्निवेदपञ्चनागगोशिवेषुगः१,२,३,४,५,८,९,
११,पङ्गुतःकुदृक्कृतागनागादिपञ्चकस्थितोऽथ, १,२,४,७,
८,९,१०,११,१२,लग्नतः क्षितिद्विवेदकालनागदिक्‌शिवे-
षुगः'। १,२,४,६,८,१०,११,बुधरेखाः ।५५। 'सुरराजगुरुः
शुभदोरवितः कुयमानलवेदनगादिकपञ्चगतो १,२,३,४,७,
८,९,१०,११, ऽथ विधोर्द्विशराचलगोशिवगो, २,५,७,९,
११, वसुधातनयात् कुयमाब्धिनगाष्टदशेशगतो, १, २, ४,
७,८,१०,११, ऽथ बुधात् क्षितियुग्मकृतेषुरसग्रहदिग्गि-
रिशोपग । १,२,४,५,६,९,१०,११,स्तदनु स्वतएकयमानल-
वारिधिपर्व्वतनागदशेशगतो, १, २, ३, ४, ७, ८, १०,
११, ऽथ सितादुयमपञ्चरसग्रहदिक्‌शिवगो २, ५, ६, ९,

१० ११, रविनन्दनतोदहनेषुरसार्कगत, ३, ५, ६, १२,
स्त्वथ लग्नगृहात् कुयमाविधशरर्त्तुनगग्रहदिग्गिरिशोप-
गतः" । १, २, ४, ५, ६, ७९, १०, ११, गुरुरेखाः,
५६, 'भृगुः शुभोरवेर्गजेशसूर्य्यगो ८,११,१२, ऽथ चन्द्र-
तः, क्ष्मादिपञ्चकाष्टगोशिवार्कगः, १, २, ३, ४, ५, ८,
९' ११, १२, कुजात्त्रिवेदकालगोशिवार्कगो, ३, ४, ६,
९, ११, १२, ऽथ बुधात्त्रिकालरन्ध्ररुद्रसंस्थितः, ३,
६, ९, ११, गुरोः शराष्टरन्ध्रदिङ्महेशग, स्ततः ५,
८९, १०, ११, स्वतः कुपञ्चकाष्टरन्ध्रदिक्‌शिवोपगः । १,
२, ३, ४, ५ ८, ९, १०, ११, शनेर्गुणाब्धिपञ्चनाग-
गोदशेशगो, ३, ४,५, ८९, १०, ११,ऽथ लग्नतः कुप-
ञ्चकाष्टगोशिवस्थितः शुभः । १, २, ३, ४, ५, ८, ९, ११,
शुक्ररेखाः, ५१, 'शुभः पङ्गुरर्कात् यमाम्भोधिशैलाष्ट-
दिक्‌शम्भुग, १, २ ४, ७, ८, १०, ११, इन्दुतोरामका-
लेशगतः, ३, ६, १२, क्ष्मासुताद्वह्निवाणर्त्तुकाष्ठाशिवार्को-
पगो, ३, ५, ६, १०, ११, १२, ऽथ ज्ञतः कालदन्ताव-
लादिस्थितः ६, ८, ९ ,१०, ११, १२, जीवतोवाणकाले-
शमार्त्तण्डयात, ५, ६, ११, २२, स्ततोदैत्यपूज्यादनेहः-
शिवार्कोपयातः । ६, ११,१२, स्वतोवीतिहोत्रेषुकालेशया-
त, ३, ५, ६, ११, स्ततोलग्नतः क्ष्मागुणाम्भोधिषड्‌दि-
ङ्‌महेशस्थितः । १, ३, ४, ६ १०, ११, शनिरेखाः,
३९, । 'राहुःशुभोऽर्काद्‌भुजवह्निवेदर्त्तुरन्ध्रगो, २, ३, ४,
६,९, ऽथ चन्द्रात् कुरामवेदाङ्गग १, ३' ४, ६, स्ततः
कुजाद्वह्निवाणाङ्गरन्ध्रगतो, ३, ५, ६, ९, ऽथ बुधाच्छ-
शिपक्षवह्निवाणरन्ध्रग, १, २, ३, ५, ९, स्ततोजीवाद्व्य-
वाहवेदाङ्गरन्ध्रग, ३, ४, ६, ९, स्ततः शुक्रात् पक्षवह्नि-
वाणरन्ध्रगत, २, ३, ५, ९, स्वतः सौरात् पक्षवाणर्त्तुग,
२,५,६,स्ततः स्वतः शशिवेदवाणरिपुरन्ध्रगो, १,४,५,६,९,
ऽथ लग्नाद्वेदरन्ध्रदिग्रुद्रसूर्य्यगतः, ४, ९,१०,११, १२ ।
राहुरेखाः, ३९ । सूर्य्यादेकद्विचतुःसप्ताष्टदशैकादशेषु, १,
२, ४, ७, ८, १० ११, सोमात्त्रिषड्दशैकादशेषु, ३,
६, १०, ११, भौमात्त्रिपञ्चषडेकादशेषु, ३, ५, ६,
११, बुधात् षड्‌ष्टनवदशैकादशेषु, ६,८,९,१०,११, गुरोः
पञ्चषडेकादशद्वादशेषु, ५, ६,११,१२, शुक्रात्षडेकादश-
द्वादशेषु,६,११,१२, शनेस्त्रिपञ्चाष्टदशैकादशेषु ३,५,८,१०,
११, लग्नादेकत्रिचतुःषड्दशैकादशेषु, १,३,४,६,१०,
११,लग्नरेखाः २८ । इति निगदितमिष्टं नेष्टमन्यद्विशे-
षादधिकफलविपाकं जन्मना तत्र दद्युः । उपचयगृह-